श्रीगणेशायनमः॥ ॐ ॥ अथशिक्षांप्रवक्ष्यामि पाणिनीयंमतंयथा॥ शास्त्रानुपूर्वंतद्विद्याद्यथोक्तंलो
कवेदयोः॥ १॥ प्रसिद्धमपिशब्दार्थमविज्ञातमबुद्धिभिः॥ पुनर्व्यक्तीकरिष्यामि वाचउच्चारणे विधिं
॥ २॥ त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शंभुमतेमताः॥ प्राकृतेसंस्कृतेचापिस्वयंप्रोक्ताःस्वयंभुवा॥
॥ ३॥ स्वराविंशतिरेकश्चस्पर्शानांपंचविंशतिः॥ यादयश्चस्मृताह्यष्टौचत्वारश्चयमाःस्मृताः॥ ४॥
अनुस्वारोविसर्गश्चᳲकःᳲपौचापिपराश्रितौ॥ दुःस्पृष्टश्चेतिविज्ञेयोलृकारः प्लुतएवच॥ ५॥ आ
त्माबुध्यासमेत्यार्थान्मनोयुंक्तेविवक्षया॥ मनःकायाग्निमाहंतिसप्रेरयतिमारुतं॥ ६॥ मारु
तःस्तूरसिचरन्मंद्रंजनयतिस्वरं॥ प्रातःसवनयोगंतंछंदोगायत्रमाश्रितं॥ ७॥ कंठेमाध्यंदि
नयुगंमध्यमंत्रैष्टुभानुगं॥ तारंतार्तीयसवनंशीर्षण्यंजागतानुगं॥ ८॥ सोदीर्णोमूर्ध्न्यभिहतो

वक्त्रमापद्यमारुतः॥ वर्णाञ्जनयतेतेषांविभागःपंचधास्मृतः॥ ९॥ स्वरतःकालतःस्थानात्प्र
यत्नानुप्रदानतः॥ इतिवर्णविदःप्राहुर्निपुणंतंनिबोधत॥ १०॥ २॥ उदात्तश्चानुदात्तश्चस्वरित
श्चस्वरास्त्रयः॥ ह्रस्वोदीर्घःप्लुतइतिकालतोनियमाअचि॥ ११॥ उदात्तेनिषादगांधारावनुदा
त्तेऋषभधैवतौ॥ स्वरितप्रभवाह्येतेषड्जमध्यमपंचमाः॥ १२॥ अष्टौस्थानानिवर्णानामुरः
कंठःशिरस्तथा॥ जिह्वामूलंचदंताश्चनासिकोष्ठौचतालुच॥ १३॥ ओभावश्चविवृत्तिश्च
१ शषसारेफएवच॥ जिह्वामूलमुपध्माचगतिरष्टविधोष्मणः॥ १४॥ यद्योभावप्रसंधानमुका
रादिपरंपदं॥ स्वरांतंतादृशंविद्याद्यदन्यद्व्यक्तमूष्मणः॥ १५॥ ३॥ हकारंपंचमैर्युक्तमंतस्था
भिश्चसंयुतं॥ औरस्यंतंविजानीयात्कंठ्यमाहुरसंयुतं॥ १६॥ कंठ्यावहाविचुयशास्ता

या॥ लव्या ओष्ठजावुपू॥ स्युर्मूर्धन्या ऋटुरषा दंत्या ऌतुलसाः स्मृताः॥१७॥ जिह्वामूले तु कुः
प्रोक्तो दंत्योष्ठ्यो वः स्मृतो बुधैः॥ एऐ तु कंठतालव्या ओऔ कंठोष्ठजौ स्मृतौ॥१८॥ अर्धमात्रा
तु कंठ्यस्य एकारैकारयोर्भवेत्॥ ओकारौकारयोर्मात्रा तयोर्विवृतसंवृतं॥१९॥ संवृ
तं मात्रिकं ज्ञेयं विवृतं तु द्विमात्रिकं॥ घोषा वा संवृताः सर्वे अघोषा विवृताः स्मृताः॥२०॥
वि ॥४॥ स्वराणामूष्मणां चैव विवृतं करणं स्मृतं॥ तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव च
॥२१॥ अनुस्वारयमानां च नासिका स्थानमुच्यते॥ अयोगवाहा विज्ञेया आश्रयस्था
नभागिनः॥२२॥ अलाबुवीणानिर्घोषो दंत्यमूल्यस्वराननु॥ अनुस्वारस्तु कर्तव्यो नित्यं ह्रोः
शषसेषु च॥२३॥ अनुस्वारे विवृत्त्यां तु विरामे चाक्षरद्वये॥ द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रो

कारवकारयोः॥२४॥ व्याघ्री यथा हरेत्पुत्रान्दंष्ट्राभ्यां न च पीडयेत्॥ भीता पतनभेदाभ्यां
तद्वद्वर्णान्प्रयोजयेत्॥२५॥५॥ यथा सौराष्ट्रिका नारी तक्रँ इत्यभिभाषते॥ एवं रंगाः प्र
योक्तव्याः खे अराँ इव खेदया॥२६॥ रंगवर्णं प्रयुंजीरं नो ग्रसेत्पूर्वमक्षरं॥ दीर्घस्वरं प्रयुं
जीयात्पश्चान्नासिक्यमाचरेत्॥२७॥ हृदये चैकमात्रस्त्वर्धमात्रस्तु मूर्धनि॥ नासिका
यां तथार्धं च रंगस्यैवं द्विमात्रता॥२८॥ हृदयादुत्करे तिष्ठन्कांस्येन समनुस्वरन्॥ मार्दवं च
द्विमात्रं च जघन्वाँ इति निदर्शनं॥२९॥ मध्ये तु कंपयेत्कंपमुभौ पार्श्वौ समौ भवेत्॥ सरंग
कंपये कंपं रथीवेति निदर्शनं॥३०॥ एवं वर्णाः प्रयोक्तव्या नाव्यक्ता न च पीडिताः॥ स
म्यक्वर्णप्रयोगेण ब्रह्मलोके महीयते॥३१॥६॥ गीती शीघ्री शिरःकंपी तथा लिखित

पाठकः॥ अनर्थज्ञोल्पकंठश्च षडेते पाठकाधमाः॥ ३२॥ माधुर्यमक्षरव्यक्तिः पदछेदस्तु सु
स्वरः॥ धैर्यं लयसमर्थं च षडेते पाठका गुणाः॥ ३३॥ शंकितं भीतमुद्घुष्टमव्यक्तमनुनासि
कं॥ काकस्वरं शिरसि गतं तथा स्थानविवर्जितं॥ ३४॥ उपांशु दष्टं त्वरितं निरस्तं विलं
र बितं गद्गदितं प्रगीतं॥ निष्पीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं न तु सानुनास्यं॥ ३५॥ प्रातः
पठेन्नित्यमुरःस्थितेन स्वरेण शार्दूलरुतोपमेन॥ मध्यंदिने कंठगतेन चैव चक्राह्वसं
कूजितसंनिभेन॥ ३६॥ तारं तु विद्यात्सवनं तृतीयं शिरोगतं तच्च सदा प्रयोज्यं॥ मयू
रहंसान्यभृतस्वराणां तुल्येन नादेन शिरःस्थितेन॥ ३७॥ अचोऽस्पृष्टा यणस्त्वीषन्ने
मस्पृष्टाः शलः स्मृताः॥ शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः॥ ३८॥ ॥३॥

ञमोऽनुनासिका न ह्रौ नादिनो हझषः स्मृताः॥ ईषन्नादा यणो जश्च श्वासिनस्तु खफादयः॥ ३९॥
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत्प्रचक्षते॥ दाक्षीपुत्रः पाणिनिना येनेदं व्यापितं भुवि॥ ४०॥ छंदः
पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते॥ ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥ ४१॥ शि
क्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतं॥ तस्मात्सांगमधीत्यैव ब्रह्मलोके महीयते॥ ४२॥ उ
दात्तमाख्याति वृषोंगुलीनां प्रदेशिनीमूलनिविष्टमूर्धा॥ उपांतमध्ये स्वरितं धृतं च
कनिष्ठिकायामनुदात्तमेव॥ ४३॥ उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोंगुलिं॥ निहतं तु
कनिष्ठिक्यां स्वरितोपकनिष्ठिकां॥ ४४॥ अंतोदात्तमाद्युदात्तमुदात्तमनुदात्तं नीचस्व
रितं॥ मध्योदात्तं स्वरितं द्व्युदात्तं त्र्युदात्तमिति नवपदशय्या॥ ४५॥ अग्निः सोमः प्र वो वी

५ त्रिनयनमभिमुखनिःसृतामिमां य इह पठेत्प्रयतश्च सदा द्विजः ॥ स भवति धनधा
न्यपशुपुत्रकीर्तिमानतुलं च सुखं समश्नुते दिवीति द्दिवीति ॥ ६० ॥ ११ ॥ अ
थशिक्षामात्मोदात्तश्च हकारं स्वराणां यथागो त्समश्नोस्य श्लोदात्तं चापरस्तु
ह्नो करणं कादित्वा ॥ ११ ॥ इति शिक्षा समाप्तः ॥ श्रीरवडुगेश्वरायनमः ॥
आठल्येइत्युपनाम कपभाकरस्येदं पुस्तकं ॥ शके १७ .७ निभ्या
द्यसंवत्सरे चैत्रशुक्लचतुर्दश्यां समाप्तः ॥ श्रीसांबार्पणमस्तु

५